# Ch. 5 Īśvara

According to HVSS, follows the Vacanāmṛtam, *Īśvara*, is the second ontological reality, though in Śikṣāpatrī this term is used in the sense Paramśevara, as in the case of Śrī Vaiśnāvism. Īśvara in Śrī Swāmināṛāyaṇism is separate from and below Paramśevara or Parabrahman. Prakṛti and Puruṣa in which Puruṣa is Akṣara-Mukta create Īśvaras, specially assigned the task to create the cosmos, with the help of Prakṛti (HVSS 13 : 9-10).

श्रीहरिस्तमुवाचाऽथ श्रृणु साधो रमापतेः।
विश्वोप्तत्यादिहेतू द्वे शक्तिप्रकृतिपूरुषौ॥ ९॥

ताभ्यां वैराजरूपोऽसौ ब्राह्मकल्पे निजां गतः।
ब्रह्मादिस्तंबपर्यन्तं ससर्ज निखिलं जगत्॥ १०॥

This concept of Īśvara as different is based on the statements of Śvetāśvatara Upaniṣad it states तमीश्वराणां परमं महेश्वरम्। that one is the Highest and the Greatest of all Īśvaras (Śvetāśvatara Upaniṣad 6-7).

न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽमग्निः। तमेव भान्तमनुभान्तिसर्वम्। In the residence of the Lord - no sun, moon, starts or lightening shine, how can there be this fire. As a matter of fact all these (gods of light) shine because of Him (Muṇḍaka Upaniṣad 2-2-10).

The terms Īśvaras is used for the following three;

| | |
|---|---|
| (1) *Vaiṛāja-puruṣa* | HVSS 7 : 10; HVSS 164 : 11-12 |
| (2) *Pradhāna-puruṣa* | HVSS 12 : 27-28 |
| (3) *Brahmā*, i.e., the Creator | HVSS 155 : 42 |

**विराडादिषु तादात्म्यं देहेष्वीशस्य तु त्रिषु।**
**लक्ष्माऽन्वयेन गदितं तथोत्पत्त्यादिकर्तृता॥ १०॥**

HVSS 7 : 10

विराडिति। विराडादिषु विराट् सूत्रात्माऽव्याकृताख्येषु। त्रिषु। देहेषु। तादाम्यं तदेकभावेन वर्तनम्। तथा। उत्पत्यादिकर्तुता जगत उत्पतिस्थितिप्रलयकर्तृत्वम्। ईशस्य वैराजाख्येश्वरस्य। अन्वयेनान्वयभावेन। लक्ष्म लक्षणम्। गदितम्॥ ७-१०॥

**स्थूलं सूक्ष्मं कारणं च जीवस्येति वपुस्त्रयम्।**
**विराट्सूत्राव्याकृताख्यं वैराजस्य वपुस्त्रयम्॥ ११॥**

HVSS 164 : 11

स्थूलमिति। जीवस्य स्थूलम्। सूक्ष्मम्। कारणं च। इत्येवंविधम्। वपुस्त्रयम्। अस्ति। वैराजस्य। विराट्मूत्राव्याकृताख्यम् वपुस्त्रयम्। अस्ति॥ १६४-११॥

**वैराजस्यापि देहस्तु तत्त्वैर्हि महदादिभिः।**
**स्वस्वांशैरेव रचितो भवतीश्वरनोदितैः॥ १२॥**

HVSS 164 : 12

वैराजस्येति। वैराजस्यापि। देहो विराट्शरीरं तु। ईश्वरनोदितैः परमेश्वरेणान्तर्यामिशक्त्या प्रेरितैः। महदादिभिः तत्त्वैः। स्वस्वांशैरेव। रचितः। भवति॥ १६४-१२॥

**श्रीकृष्णो भगवानावक्षराख्यपुमात्मना।**
**मायायामीक्षणेनैव स्वेच्छया गर्भमादधौ॥ २७॥**

HVSS 12 : 27

श्रीकृष्णेति। हे मुने!। भगवान्सकलैश्वर्यसम्पन्नतयाऽक्षरब्रह्माख्यस्वधामावस्थितः। श्रीकृष्णः। आदौ प्रथमम्। स्वेच्छया स्वसङ्कल्पेन। **अक्षराख्यपुमात्मना पूर्वमक्षरब्रह्मतेजसि। प्रसुप्तमक्षराख्यं पुरुषं प्रबोध्य तेनाक्षरसञ्ज्ञपुरुषरूपेण। मायायां मूलप्रकृतौ। ईक्षणेनैव वीक्षणमात्रेण। गर्भम्। आदधौदधार॥ १२-२७॥**

**ततः प्रधानपुरुषकोटयश्चाभवमन्मुने।**
**ब्रह्माण्डकोटस्तेभ्य भवन्ति स्मेश्वरेच्छया॥ २८॥**

HVSS 12 : 28

ततः इति। हे मुने!। ततो मूलप्रकृतेः सकाशात्। प्रधानपुरुषकोटयः। अपरिमितानि। प्रधानपुरुषद्वन्द्वानीत्यर्थः। अभवन्मप्रादुर्बभूवुः। ईश्वरेच्छया परमेश्वरश्रीकृष्णसङ्कल्पेन। तेभ्यः प्रधानपुरुषद्वन्द्वेभ्यः। ब्रह्माण्डकोटयोऽसङ्ख्यातानि ब्रह्माण्डानि च। भवन्ति स्म॥ १२-२८॥

**ब्रह्माण्डानामीश्वरा ये ब्रह्मरुद्रादयश्च ते।**
**श्रीकृष्णाय यथा तद्वद्बलींस्तेभ्योऽर्पयन्ति हि॥ ४२॥**

HVSS 155 : 42

ब्रह्माण्डानामिति। किञ्च। ब्रह्माणानामगणिताण्डानाम्। ईश्वरा अधिपतयः। ये। ब्रह्मरुद्रादयः। ते। यथा। श्रीकृष्णाय। बलीन्नानाविधोपहारान्। अर्पयन्ति तद्वत्तथा। तेभ्यः साधुभ्योऽपि अर्पयन्ति॥ १५५-४२॥

*Īśvara,* in his own world (*Brahmāṇḍa*) is, omniscient, omnipotent, and omnipresent, having three types of bodies *Virāta, Sūtrātmā,* and *Avyākṛta*. As the *Brahmāṇḍa*s are eternal, in the sense of the flux (*nitya-*

*pravāha*), so are the *Īśvaras*. They are creators, governors, destroyer, from eternity, (*anādinidhan*).

It should be therefore very clear that the ontological reality of *Īśvara* is totally different in the Swāmināràyaṇism from that of Śrī Vaiṣṇavism. They are cosmic selves, higher than the Jīvātmas but bound to Māyā and dependent upon supreme God (*Paramātmā*).

All the Pradhāna Puruṣas who unite with lower Prakṛti, are *Īśvaras,* and are sometimes called *Māyā-śabalita-brahman*; sometimes *Mahaviṣṇu* including *Aniruddha, Pradyumna, Saṁkarṣaṇa,* and *Virāta-Nārāyaṇa* are included in *Īśvara* category.

*Īśvaras* (Cosmic Selves) too have their *ātman* of atomic size, though of course they are endowed with power-opulence (*aiśvarya*) as a property specific to them. In addition, their *Jñāna-śakti* is much expanded to cover the knowledge of the whole world, which they rule.

Every *Īśvara* has the quality of existence-consciousness-bliss (*sat, cid, ānanda*) manifest in a much higher degree or quantum than that of the Jivas. The power, strength, capacity, life span, and knowledge of the *Īśvaras* are comparatively far more wide and excellent than that of the Jīvas. They are not limited by the conditioning adjuncts of actions (*avidyā-karma*) that invariably limit and bind the Jīvas. They are bound or conditioned by the adjuncts of Mahāmāyā. The Inner Self and the Witness in all *Īśvaras* is the Lord Parabrahman as their Antaryāmi Ātman. He is their supporter, controller, and the source of power and strength in them. Śrī Śatānanda describes the difference between the metaphysical reality of Jīva and Īśvara as per Śrī Swāmināràyaṇism in the following ślokas. The commentary Setumālā also explains the same in details.

कर्तव्यः परिहारोऽस्य साधुसम्प्राप्तयुक्तिभिः।
भेदोऽस्ति जीवेश्वरयोः सत्यस्तद्वपुषोस्तथा॥ २१ ॥

HVSS 128 : 21

कर्तव्य इति। अस्यैवंविधदोषस्य। परिहारो निवर्तनम्। साधुसम्प्राप्तयुक्तिभिः। कर्तव्यः। युक्तीराह सार्द्धैः पञ्चभिः। जीवेश्वरयोः। तथा। तद्वपुषोः। भेदः सत्यः। अस्ति॥ १२८-२१ ॥

**परतन्त्रोऽल्पविज्जीवः स्वतन्त्रोऽन्यस्तु सर्ववित्।**
**चिद्रूपयोरपि तयोर्विशेषो भवतीदृशः ॥ २२ ॥**

HVSS 128 : 22

परतन्त्र इति। जीवः। परतन्त्रः। अल्पविदल्पज्ञः। अस्ति। अन्य ईश्वरस्तु। स्वतन्त्रः। सर्ववित्। अस्ति। ईदृश एवंविधः। **चिद्रूपयोश्चैतन्यस्वरूपयोरपि। तयोर्जीवेश्वरयोः। विशेषो भेदः। भवति ॥ १२८-२२ ॥**

**पृथिव्यादीनि तत्त्वानि पञ्चानीश्वरविग्रहे।**
**महान्ति भूतसञ्ज्ञानि जीवदेहधराणि च ॥ २३ ॥**

HVSS 128 : 23

पृथिवीति। पृथिव्यादीनि। पञ्चापि। तत्त्वानि। ईश्वरविग्रहे। महान्ति महत्तया। सन्ति। भूतसञ्ज्ञानि भूताख्यानि। जीवदेहधराणि सर्वेषां जीवदेहानां धारकाणि च। सन्ति **॥ १२८-२३ ॥**

**जीवदेहे तु पञ्चापि तान्यल्पानि भवन्ति च।**
**एवं देहविशेषोऽपि तयोर्ज्ञेयश्च तात्त्विकः ॥ २४ ॥**

HVSS 128 : 24

जीवेति। पञ्चापि। तानि पृथिव्यादितत्त्वानि। जीवदेहे तु। अल्पानि। चकारादनन्यधारकाणि। भवन्ति। एवममुना प्रकारेण। तात्त्विकः सत्यः। **तयोर्जीवेश्वरयोः। देहविशेषोऽपि देहभेदोऽपि। ज्ञेयः ॥ १२८-२४ ॥**

**जीवेशयोरुपास्योऽस्ति परमात्मा तु तत्परः।**
**कारणं कारणानां स ईश्वराणामपीश्वरः ॥ २५ ॥**

HVSS 128 : 25

जीवेति। तत्परः षड्विंशत्वेन जीवेश्वराभ्यामन्यः। परमात्मा तु। जीवेशयोः। उपास्यः। अस्ति। स परमात्मा। कारणानां मूलप्रकृतिपुरुषादीनाम्। कारणम्। ईश्वराणामपि। ईश्वरः। अस्ति **॥ १२८-२५ ॥**

**वैराजस्यापि देहस्तु तत्त्वैर्हि महदादिभिः।**
**स्वस्वांशैरेव रचितो भवतीश्वरनोदितैः ॥ १२ ॥**

HVSS 164 : 12

वैराजस्येति। वैराजस्यापि। देहो विराट्शरीरं तु। ईश्वरनोदितैः परमेश्वरेणान्तर्यामिशक्त्या प्रेरितैः। महदादिभिः तत्त्वैः। स्वस्वांशैरेव। रचितः। भवति **॥ १६४-१२ ॥**

**वैराजोऽप्येवमेवास्ति द्विपरार्द्धावधि स्वके।**
**देहे बद्धो वासुदेवध्यानान्मुक्तिमुपैति च ॥ २२ ॥**

HVSS 164 : 22

वैराज इति। एवमुक्तविधजीववदेव। वैराजोऽपि द्विपरार्द्धवधि द्विपरार्द्धकालपर्यन्तम्। स्वके। देहे विराट्सञ्ज्ञे। बद्धः। अस्ति। वासुदेवध्यानात्। मुक्तिं च। उपैति **॥ १६४-२२ ॥**

**सङ्कर्षणमुपास्तेऽसौ प्रलयेऽथ स्थितावपि।**
**प्रद्युम्नं च तथोत्पत्तावनिरुद्धाख्यमीश्वरम् ॥ २३ ॥**

HVSS 164 : 23

सङ्कर्षणमिति। असौ वैराजः। प्रलये प्रलयावस्थायाम्। सङ्कर्षणम्। उपास्ते अथ च। स्थितौ स्थित्यवस्थायामपि। प्रद्युम्नम्। उपास्ते। तदा। उत्पत्तावुत्पत्त्यवस्थायाम्। अनिरुद्धाख्यम्। ईश्वरम्। उपास्ते **॥ १६४-२३ ॥**

**सङ्कर्षणादयस्तिस्त्रो वासुदेवस्य मूर्त्तयः।**
**गुणात्मिका भवंत्येव त्रिवर्गफलसिद्धिदाः ॥ २४ ॥**

HVSS 164 : 24

सङ्कर्षणेति। वासुदेवस्य। सङ्कर्षणादयः। तिस्त्रः। मूर्तयः। गुणात्मिकास्तम आदिगुण-त्रयात्मिकाः। त्रिवर्गफलसिद्धिदा धर्मादित्रिवर्गव्युष्टिनिष्पातिप्रदा एव। भवन्ति ॥ **१६४-२४** ॥

**उत्पत्त्यादिकार्यसिद्धिस्तदुपासनयाऽस्य तु।**
**भवत्यथो मोक्षसिद्धिर्वासुदेवैकचिन्तनात् ॥ २५ ॥**

HVSS 164 : 25

उत्पत्तीति। अस्य वैराजस्य। उत्पत्यादिकार्यसिद्धिस्तु। तदुपासनया सङ्कर्षणाद्युपासनेन। भवति। अथो अथ च। मोक्षसिद्धिस्तु। वासुदेवैकचिन्तनात्। भवति ॥ **१६४-२५** ॥

**वासुदेवोपासनं च वैराजस्य न दुष्करम्।**
**शुद्धान्तःकरणत्वेन तत्सांनिध्यस्य सम्भवात् ॥ २६ ॥**

HVSS 164 : 26

वासुदेवेति। किञ्च। वैराजस्य। शुद्धान्तःकरणत्वेन हेतुना। तत्सान्निध्यस्य वासुदेवसमीपत्वस्य। सम्भवाद्विद्यमानत्वात्। वासुदेवोपासनाम्। दुष्करं दुःसाध्यम्। नास्ति ॥ **१६४-२६** ॥

**असावपि न कुर्वीत वासुदेवस्य सर्वथा।**
**उपासनां दृढां यावत्तावन्नैव विमुच्यते ॥ २७ ॥**

HVSS 164 : 27

असाविति। तथापि। असौ वैराजः। यावत्। वासुदेवस्य। उपासनाम्। सर्वथा। दृढामेकान्तिकीम्। न कुर्वीत। तावत्। नैव। विमुच्यते ॥ **१६४-२७** ॥

Thus there is vast and irreconcilable difference between Śrī Rāmānujācārya and Śrī Swāminārāyaṇa about the concept of Īśvara.